**दिनाङ्क :- 18.08.2024**
**प्रातः - 06:55**

## अथ वार्ताः

## प्रधानमन्त्री वैश्विक दक्षिणाभासीय सम्मेलनम्

प्रधानमन्त्री श्रीनरेन्द्र मोदी ह्यः तृतीय 'ग्लोबल साउथ वर्चुअल सम्मिट' इति सम्मेलनस्य औद्घाटानिके वक्तव्ये वैश्विक-दक्षिण-देशानाम् आह्वानम् अकरोत् यत् ते सम्भूय कार्याचरण-पूर्वकं परस्परं सहायकीभूता: भवन्तु। प्रधानमन्त्रिणा वर्तमान-वैश्विक-वातावरणे अनिश्चिततानां, समाह्वानानां, समस्यानाञ्च विषयेऽपि चिन्ता प्रकटीकृता। अमुना भणितं यत् विश्वम् अधुना यावत् कोविड-दुष्प्रभावात् पूर्णतोदृशा नैव सुरक्षितं समुद्धृतं चास्ति। अथ चानेन साकमेव संघर्षस्य परिस्थितिश्चापि वैश्विक-दक्षिण-देशानां विकास-यात्रायां महत्वपूर्ण-समाह्वानम् उत्पादयति। श्रीमोदिना प्रोदितं यत् इमे देशा: जलवायु-परिवर्तनं समेत्य स्वास्थ्यं, भोजनं, ऊर्जापूर्ति: सुरक्षा चेति समाह्वानानामपि साम्मुख्यं कुर्वन्तो वर्तन्ते। प्रधानमन्त्रिणा आश्वासितं यत् भारतं निजानुभवै: सामर्थ्येन च वैश्विक-दक्षिणस्य समेषामपि देशानां सहायतार्थं सर्वदा तत्परमस्ति। अमुना प्रोदीरितं यत् सद्यस्तनेषु वर्षेषु आधारिक-संरचना, अङ्कीय-व्यवस्थापनं, ऊर्जासम्पर्क-समेधनं चेति मध्यमै: वैश्विक-दक्षिण-सहयोग-समावलम्बनमेधितम् अस्ति। श्रीमोदना प्रतिपादितं यत् 'मिशन लाइफ' इत्यभियानान्तर्गतं नवदिल्ली केवलं भारते एव नैव प्रत्युत मित्र-देशानां गृहाणां छदिषु अपि सौरोर्जोत्पादनं नवीकरणीयोर्जा-समुत्पादनञ्च प्राथम्येन समाचरति। भाषणस्य अवसाने श्रीमोदिना प्रत्यपादि यत् अद्यतन-चर्चाभि: सम्भूय युगपदेव अग्रे वर्धनस्य मार्ग: प्रशस्तीभूत: अस्ति। अमुना आशास्तं यत् एष: सामूहिको विमर्श: वैश्विक दक्षिण-देशै: निर्धारित-लक्ष्याणां प्राप्तये विहितान् प्रयासान् सफलयिष्यति।

## नेपाल विदेशमंत्री

नेपालदेशीय: विदेशमन्त्री डॉ. आरजु राणा देउबा विदेशमन्त्री डॉ. एस जयशंकरस्य आमन्त्रणे अद्य पञ्चदिवसीय आधिकारिकयात्रायाम् भारतं प्रति आगमिष्यति। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत्, एषा यात्रा भारत-नेपालयोः नियमित-उच्चस्तरीय-आदान-प्रदानस्य परम्परायाः अनुरूपं वर्तते।

## **राजनाथः -**

रक्षामन्त्री राजनाथसिंहः अद्य चेन्नै-नगरस्य यात्रावधौ भारतीयतटरक्षकस्य नूतनस्य अत्याधुनिकस्य सामुद्रिक-साहाय्य-समन्वयकेन्द्रस्य उद्घाटनं करिष्यति। सः चेन्नैनगरे समुद्रप्रदूषणप्रतिक्रियाकेन्द्रस्य, पुडुचेरीनगरे तटरक्षकवायुक्षेत्रस्य च उद्घाटनं करिष्यति। चेन्नै- जलापोतस्थानके स्थितं प्रदूषणकेन्द्रं समुद्रप्रदूषणप्रबन्धने महत्वपूर्णभूमिकाम् निभालयिष्यति।

## **IMA प्रधानमन्त्री पत्रम्**

भारतीयचिकित्सासङ्घः आईएमए प्रधानमन्त्रिणे नरेन्द्रमोदिने आर जी कर चिकित्सामहाविद्यालये घटितायाः घटनायाः विषये पत्रं लिखितवान् तथा च स्वास्थ्यसेवाकर्मचारिणः विरुद्ध्य हिंसायाः अन्वेषणप्रक्रियायां केन्द्रीयविधिम् निर्मातुं तस्य हस्तक्षेपं प्रार्थितवान्। सर्वेषां चिकित्सालयानाम् सुरक्षानियमाः विमानस्थानकस्य अनुसारं भवेयुः इति भारतीयचिकित्सासङ्घस्य आग्रहः अस्ति।

## **जयशंकर-कुवैत यात्रा**

विदेशमन्त्री डॉ एस जयशंकरः अद्य कुवैतस्य आधिकारिकयात्रायां भविष्यति। यात्रावधौ डॉ. जयशंकरः निजकुवैतस्य स्वीयसमकक्षस्य अब्दुल्लाह अली अल-याह्या इत्यनेन सह मेलनं करिष्यति। सः कुवैतस्य नेतृत्वेन सह अपि मेलनं करिष्यति इति सूच्यते। डॉ. जयशंकरस्य अनया यात्रया द्वयोः पक्षयोः व्यापारे, निवेशे, ऊर्जायां, सुरक्षायां, सांस्कृतिके, जनसम्पर्के च समीक्षाम् भविष्यति।

**।।इति वार्ताः।।**